## एकादशः पाठः

# अस्माकं प्रदेशः

## सप्तमी विभक्तिः




(शिक्षकः कक्षायां प्रविशति मानचित्रं भित्तिकायां स्थापयित्वा दर्शयति)

शिक्षकः – भो छात्राः! किम् एतद्?

छात्राः – एतद् मानचित्रम्?

शिक्षकः – मोहन! मानचित्रे किं प्रदर्शितम्?

मोहनः – मानचित्रे भारतदेशस्य रूपं प्रदर्शितम्।

शिक्षकः – भारतदेशस्य मध्यभागे कः प्रदेशः दृश्यते?

छात्राः – भारतदेशस्य मध्यभागे मध्यप्रदेशः तथैव दृश्यते यथा शरीरस्य मध्यभागे हृदयं दृश्यते।

शिक्षकः – माले! मध्यप्रदेशस्य मध्यभागे का नदी प्रवहति?

माला – मध्यप्रदेशस्य मध्यभागे नर्मदा नदी अस्य मेखला इव प्रवहति।

शिक्षकः – सुरेश! नर्मदायाः उत्तरदक्षिणदिक्षु किं दृश्यते?

सुरेशः – नर्मदायाः उत्तरदिशि विन्ध्याचलमाला, दक्षिणदिशि सतपुड़ा पर्वतमाला च दृश्येते।

विवेकः – आर्य! भोपालनगरे अपि विन्ध्याचलः सतपुड़ा च स्तः?

शिक्षकः – सत्यम्। भोपालनगरे विन्ध्याचलः सतपुड़ा इति च द्वे प्रमुखे शासकीयभवने स्तः।

सुधा – महोदय! मध्यप्रदेशस्य गठनं कदा अभवत्?

शिक्षकः – मध्यप्रदेशस्य गठनम् १९५६ तमे ख्रिस्ताब्दे, नवम्बर मासस्य प्रथम दिनाङ्के अभवत्।

सुरेशः – महोदय! अस्माकं प्रदेशे कति महानगराणि सन्ति?



महाकालेश्वरमन्दिरम्

शिक्षकः – भोपालम् अस्माकं प्रदेशस्य राजधानी। इन्दौर – ग्वालियर – जबलपुरप्रभृतीनि महानगराणि सन्ति।

माला – उज्जयिनी कथं प्रसिद्धा?

शिक्षकः – उज्जयिनी महाकालस्य नगरी। महाकालः द्वादशज्योतिर्लिङ्गेषु एकः अस्ति।

राघवः – प्रदेशे कानि दर्शनीयानि स्थलानि सन्ति? का विशेषता?

शिक्षकः – महेश्वरम्, मण्डलेश्वरम्, ओङ्कारेश्वरम्, नेमावरम् इत्यादीनि नर्मदातीरे स्थितानि धार्मिकस्थलानि अपि मध्यप्रदेशे सन्ति। मैहरनगरे स्थितं देव्याः शारदायाः मन्दिरम् अपि अति प्रसिद्धम्। भोपालस्थितं ''ताजुलमस्जिद'' इति यवनानां धार्मिकस्थलम् अपि प्रसिद्धम्। भीमबैठका स्थले शैलगुहासु प्राचीनतमानि चित्राणि सन्ति। खुजराहो मन्दिराणि मूर्तिकलार्थं प्रसिद्धानि। साञ्चीस्थितः स्तूपः बौद्धानां धार्मिकस्मारकः।



खजुराहोमन्दिरम्



साञ्चीस्तूपः

रमणः – मध्यप्रदेशे कानि राष्ट्रियानि उद्यानानि सन्ति?

शिक्षकः – मध्यप्रदेशस्य तृतीयांशः वनेन आवृत्तः। माधवोद्यानम्, कान्हाकिसली, बान्धवगढः इत्यादीनि राष्ट्रियानि उद्यानानि सन्ति। वनरक्षणे वनवासिनां विशेषं योगदानम् अस्ति। एते जनाः वनेषु निर्भयं विचरन्ति।

सविता – प्रदेशे कानि पर्यटनस्थलानि सन्ति?

शिक्षकः – अस्माकं प्रदेशे सतपुड़ा पर्वतश्रेण्यां 'पचमढ़ी' नामकं पर्यटनस्थलम् अस्ति। तत्र जनाः स्वास्थ्यलाभार्थम् अपि गच्छन्ति।

गिरिजा – मध्यप्रदेशे खनिजसम्पत् अपि अस्ति?

शिक्षकः – सत्यम्। मध्यप्रदेशे पन्नामण्डलं हीरकरत्नानां खनिभूमिः। लौहः, अल्यूमीनियं प्रभृति खनिजाः अपि उद्योगानाम् आधारभूताः।

राष्ट्रजीवने मध्यप्रदेशः महत्वपूर्णः उक्तं च -

जयतु जयतु भुवि भारतदेशे सुखदो मध्यप्रदेशः।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| मेखला | = करधनी | विराजते | = शोभायमान है। |
| शैलगुहासु | = पर्वत की गुफाओं में | वनेचराः | = वन में रहने वाले |
| भुवि | = भूमि में | खनिभूमिः | = खनिज भूमि |
| प्रवहति | = बहती है | आवृत्तः | = ढँका हुआ |

## अभ्यासः

१. एकपदेन उत्तरं लिखत–

(क) भारतस्य मध्ये कः प्रदेशः अस्ति?

(ख) मध्यप्रदेशस्य मध्यभागे का नदी प्रवहति?

(ग) नर्मदायाः उत्तरदिशि कः पर्वतः अस्ति?

(घ) सतपुड़ापर्वतः नर्मदायाः कस्यां दिशि स्थितः?

२. एकवाक्येन उत्तरं लिखत–

(क) मध्यप्रदेशः कुत्र विराजते?

(ख) अस्माकं प्रदेशस्य राजधानी का अस्ति?

(ग) मध्यप्रदेशस्य कस्मिन् मण्डले हीरकरत्नानि मिलन्ति?